## ।। अथ चतुः सप्ततितमोऽध्यायः ।। Chapter-74

मांधातोवाच :- कलियुगे च महावीरो जैनधर्मं चकार हि ।।
गौतमश्च कदा तस्माद् दीक्षां जग्राह बाडव: ।। १

श्रीमाले जिनधर्मश्च कथं स गौतमोऽकरोत् ।।
तन्मे सर्वं समाचक्ष्व मनसि मे कुतूहलम् ।। २

वसिष्ठ उवाच :- द्वि सहस्रा गता राजन्नब्दाः कलियुगे यदा ।।
तदा जातो महावीरो देशे काश्मिरके नृप ।। ३

गौतमोपि तदा तत्र गृहीतुं जैनधर्मकम् ।।
श्रिया वाक्येन संतुष्टो जगाम श्रीनिकेतनात् ।। ४

काश्मिरदेशं गत्वा च गौतमो मुनिसत्तमः ।।
महावीरमनुप्राप्य चाब्रवीत् प्राञ्जलिस्तदा ।। ५

गौतम उवाच :- भोभो स्वामिन् महावीर दीक्षां देहि मम प्रभो ।।
जैनधर्मं संगृहीतुमागतस्तव संनिधौ ।। ६

महावीर उवाच किंकारणेन विप्रेन्द्र धार्यते जैनधर्मकः ।।
ब्राह्मणस्त्वं श्रियाः क्षेत्रे श्रीमालिज्ञातिसंज्ञकः ।। ७

१२ धारितुं

अहिल्या तव भार्या च कृतपूर्वपरिग्रहा ।।
यदि क्रुद्धा[२ए] भवत् सा तु भस्मीभूता भवेमहि ।। ८

न दीक्षां ते ददौ विप्र तदहिल्याज्ञया बिना ।। ६

गौतम उवाच :- मम सर्गे मम कांता[१] पृष्ठेऽस्ति त्वं न शंकय ।।
स्वधर्मं च परित्यज्य तव धर्मं चरिष्यति ।। १०

द्विजाः श्रीमालिनः सर्वे मिथ्याहिंसां ददुर्मयि ।।
पालिताः सप्तकालेषु बुद्धिहीनाः स्त्रीभिस्तदा ।। ११

श्रीमालवासिनो विप्राः पंक्तमेन ददुः सदा ।।
तस्मादहं महावीर आगतस्तव संनिधौ ।। १२

दीक्षां देहि महावीर त्वंवत्वं दयां कुरु ।।
तव धर्मे क्रियाः चात्र करिष्यामि प्रसिद्धताम्[३ए] ।। १३

महावीर उवाच :- अहिल्यै देवरूपा त्वमाज्ञां देहि ममोपरि ।।
जिनधर्मं ते नाथस्य दीक्षार्थं च कृपां कुरु ।। १४

-०-

१ ए कांता
२ ए क्रुधा
३ ए ताम

अहिल्योवाच :- दीक्षार्थं ममनाथस्य चागता तव संनिधौ ।।
दीक्षां देहि च मां नाथ मम नाथे मया सह ।। १५

गौतम उवाच :- कस्मिन्नर्थे[१] त्वया क्रान्ते धार्यते जिन दीक्षकाम् ।। १६

अहिल्योवाच :- पूर्वं हं ब्रह्मणः पुत्री ब्राह्मणस्य कुलेऽजनि ।।
निमित्तेन त्वया नाथ पाणिग्राहः कृतो मम ।। १७

धिगहं नाथ संसारे पाणिग्राहस्तव प्रभो[२] ।।

उत्तमं ब्राह्मणं धर्मं त्यक्तं तं प्रस्थिता च या ।। १८

त्वया द्विजानां दुःखेन आगता चेह स्थानके ।।
अहमार्या ~~अहमार्या~~[३] भविष्यामि त्वत्तु साधुर्भव द्विज ।। १९

स्वामिना च विना नाथ संसारे किंकरोम्यहम्[४] ।।
त्वां विनेह तु संसारे दृश्यते सर्वशून्यता ।। २०

संसारे सर्वभोगादि त्वया सह गतं प्रभो ।।
तस्मात् नाथेन्द्र संसारे त्वां विना किंकरोम्यहम् ।। २१

-०-

१ ए किस्मि
२ ए तवप्रभो
३ ए अहमार्या
४ ए किंकरोम्यहम्

बसिष्ठ उवाच :- गौतमोऽहिल्यया साकं जैनदीक्षां दधे नृप ।।
गौतमो ह्यभवत् साधुरहिल्या आर्यिका-भवत् ।। २२

गौतमो वत्सरा राजन् द्व्यधिका[१,३] नवतिस्तदा ।।
साधुरूपेण भुक्त्वा च ह्यन्ते मुक्तिमवाप्नुयात् ।। २३

धृत्वादीक्षां गौतमस्तु तपः कर्तुं समुद्यतः ।।
वनमाश्रित्य संसाधुर्दयाधर्मेण संयुतः ।। २४

निराहारो जितात्मा च सरस्वतीमपूजयत् ।।[४]

व्यतीते वत्सरे पूर्णे प्रत्यक्षाभूत् सरस्वती ।। २५

उवाच परमप्रीता गौतमाय वरं ददौ ।। २६

देव्युवाच :- वरं परय भो पुत्र मत्ते मनसि वर्तते ।।
तव तपःप्रभावेण वरं तुभ्यं ददाम्यहम् ।। २७

गौतमउवाच:- यदि तुष्टा च भो देवि वरमेकं च देहि मे ।
मयाकृतानि[१] जैनानि[२] शास्त्राणि सिद्धिमाप्नुयुः ।। २८

-०-

१ ए गौतस्तु
२ ए कृताबिजैनानि
३ ए द्विधिका
४ ए सरस्वतीं पुपूज हि

तव वासंश्च भो देवि जिह्वाग्रे वर्ततां मम ॥ २६

सरस्वत्युवाच :- मा मा गौतम पुत्र त्वं साधुरूपेण तिष्ठसि ॥
अतस्त्वत्कृतं सर्वं शास्त्रं जैनं चरिष्यति ॥ ३०

वसिष्ठ उवाच :- एवं देवी वरं दत्वा ह्यन्तर्धानपराभवत् ॥
गौतमोऽपि ततो राजन्न आगत: श्रीनिकेतने ॥ ३१

शिष्यै: सहस्रैसहितो जैनधर्मप्रवर्तक: ॥
आर्यया संयुतो राजन् दयाधर्मेण संयुत: ॥ ३२

दयानां मुमतिं मुखे बिभ्राणो दंडक करे ॥
शिरसो मुण्डनं कृत्वा कुर्कां च कुंजिकां दधन् ॥ ३३

ईदृशै: सर्वशिष्यैश्च आर्यया च तथा नृप ॥
श्रिया द्वारे समागत्य स्तुतिं कर्तुं समुद्यत: ॥ ३४

गौतम उवाच :- नमस्ते तु महामाये नमस्ते विष्णुवल्लभे ॥
विप्रदु:खेन हे मातर्मया जैन: समाश्रित: ॥ ३५

अपराधं च मे मातः क्षमस्व परमेश्वरि ।।
त्वं माता च अहं पुत्र आगतस्तव संनिधौ ।। ३६

धिक् मम जीवितं मातर्येन स्वं धर्म त्याजितम् ।।
अहं दुष्टः[१] कुबुद्धिश्च जीवितोऽपि मृतः खलु ।। ३७

स्थापितोऽपि मया मातस्त्याजितोऽपि मयाधुना ।।
अतस्त्वं विश्वमातर्मेऽपराधं क्षमस्व मां ।। ३८

वसिष्ठ उवाच :- गौतमं साधुरूपेण दृष्ट्वा देवी तदा नृप ।।
नेत्राभ्यां जलं मुंचन्ती गौतमं प्रत्युवाच ह ।। ३९

देव्युवाच :- गच्छ गच्छ च हे पुत्र ह्यदृश्यो भव मे सदा ।
पश्यन्त्याः साधुरूपेण सह ते मे मनो नहि ।। ४०

मम धर्मेण संयुक्तं तव धर्मं साधयस्व मां ।।
श्रीमालवासिविप्राणां या वृत्तिः स्थापिता पुरा ।। ४१

तस्यास्त्वं खंडनं नैव करिष्यसि कदाचन ।।
याहि पुत्र स्व कै स्थाने त्वं शिष्यैः समायुत ।। ४२

-०-

१ ए-दुष्टो

वशिष्ठ उवाच :- देव्याश्च वचनं श्रुत्वा गौतमोऽपि तदा नृप ।।
गच्छति स्वासने राजन् स्थितिं कर्तुं निरन्तरम् ।। ४३

गौतममागतं श्रुत्वा केचित् वैश्यास्तदा नृप ।।
जग्मुश्च गौतमं दृष्टुं नेमुश्च गौतमं प्रति ।। ४४

ऊचुश्च परमप्रीत्या वैश्याश्च गौतमं प्रति ।।

वैश्या उचु: मामो गौतम विप्रेन्द्र किं कृतमीदृशं त्वया ।। ४५

श्रीमाले द्विजवर्याणां वरं विप्रश्च त्वां वयम् ।।
श्रिया: पुत्रस्य ज्येष्ठस्य स्मृतिरीदृशी किं तव ।। ४६

गौतम उवाच :- कुत्सितं किं वदन्त्यत्र किंकृतं गर्हितं मया ।।
जीवधर्मो मया साध्योऽनुग्रहेण श्रिया: सदा ।। ४७
गच्छत मो स्वके स्थाने हिंसाधर्मो मम प्रिय: ।।

वैश्याऊचु: न गच्छामो वयं स्वामिन् त्वां विना ह्याश्रमं क्वचित् ।। ४८
त्वयैव पालिता नूनं त्यजेम त्वां कथं प्रभो ।।
त्वं गच्छ ग्राममध्ये व वयं कुर्मस्तवाश्रमम् ।। ४९

-०-

१ ए कुर्तुन्निरन्तरम्
२ ए वदामोऽत्र २ कुचित्
३ ए त्याजेम
४ ए कुर्वाणि आश्रमं तव

वशिष्ठ उवाच :- तच्छ्रुत्वा गौतमो राजन्नागतो ग्राममध्यके ।।
दशद्वारस्थाने राजन् चक्रुस्ते साधुमाश्रमम् ।। ५०

गौतमस्तत्र स्थाने च स्थितिं कृत्वा ह्युवास ह ।।
तत्र स्थित्वा जैनधर्मं श्रीमाले तु चकार ह ।। ५१

जैनधर्मस्य शास्त्राणि बहूनि ह्यकरोत्तदा ।।
कल्पसूत्रागृतं तत्र भगवतीसूत्रमेव चैव ।। ५२

महावीरजन्मसूत्राणि कृतानि गौतमेन हि ।।
अन्यानि बहुशास्त्राणि कृतानि जिनधर्मके ।। ५३

चतुरशीतिर्गच्छशाखा: कृता: च गौतमेन वै ।।
गच्छेषु हि च सर्वेषु तपगच्छो हि मुख्यक: ।। ५४

षट्द्वारा: कृतास्तत्र जैनधर्मे प्रसिद्धा: ।।
तीर्थंकरचतुर्विंशी संख्योक्ता गौतमेन च ।। ५५

श्रीमाले च स्त्रिया: जाते जैनो गौतममाश्रित: ।।
संबभूव नृपश्रेष्ठ संप्रवृत्ते कलियुगे ।। ५६

१ ए स्थान के
२ ए सूत्रमेव च

केचिद्वैश्या जैनधर्मे प्रवृत्ता: श्रीनिकेतने ।।
केचिद्वैश्याश्च लोकाश्च विष्णुधर्मे तु तत्परा: ।। ५७

ईदृशो जैनधर्मश्च गौतमादिर्भवेन्नृप ।।
श्रीमाले च श्रिया: क्षेत्रे प्रवृत्ते जैनधर्मके ।। ५८

विष्णुधर्मविहीनन्तु दृष्ट्वा नगरमात्मन: ।।
श्रीश्च गच्छेतु श्रीमालात् स्वेच्छया च नृपोत्तम ।। ५९
श्रियां गतायां श्रीमालं सर्वं शून्यं भविष्यति ।। ६०

-०-

इतिश्री स्कन्दपुराणे एकाशितिसाहस्र्यां संहितायां तृतीय परिच्छेदे ब्राह्मविभागे श्रीमालमाहात्म्ये गौतमादि जैन धर्मप्रवृत्ति नामाचतु: सप्ततिमोऽध्याय: ।।

१ ए हिन